# Shri Yamunashtakam 9

# श्रीयमुनाष्टकम् ९

## Document Information

Text title : yamunAShTakam 9

File name : yamunAShTakam9.itx

Category : devii, nadI, aShTaka, devI

Location : doc_devii

Proofread by : NA

Latest update : January 15, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 3, 2024

*sanskritdocuments.org*

Shri Yamunashtakam 9

# श्रीयमुनाष्टकम् ९

मातर्देवि कलिन्दभूधरसुते नीलाम्बुजश्यामल
स्निग्धोद्यद्विमलोर्मिताण्डवधरे तुभ्यं नमस्कुर्महे ।
त्वं तुर्याप्यसि यत्प्रिया मुररिपोस्तद्बाल्यतारुण्ययो-
र्लीलानामवधायिकान्यमहिषीवृन्देषु वन्द्याधिकम् ॥ १॥

लोकान्यान्कलिकालकीलितमहादुष्कर्मकूटाङ्कितान्-
नेनिक्ते दिवमुत्पतिष्यति हि सा गीर्वाणकूलङ्कषा ।
तन्मातस्त्वयि संसृतिप्रसृमरक्लेशाभिभूतं मनः
स्वर्निःश्रेणिमुपेतुमर्कतनये श्रद्धां निबध्नाति नः ॥ २॥

सोन्नादं निपतन्कलिन्दशिखरप्रोत्तुङ्गशृङ्गान्तरा-
द्दृच्छन्प्राच्यमपांनिधिं जननि सद्वारां प्रवाहस्तव ।
मध्येमार्गमवाप्तभूरिविषयांस्तत्कालमुन्मार्जयन्
दिश्यान्नः श्रियमुद्धुरां मरकतश्यामाभिरामद्युतिः ॥ ३॥

शय्योत्थायमजस्रमात्मसदनात्त्वां वीक्ष्य लक्ष्यां क्षणान्-
मातः प्रातरपोहयामि विततं दुष्पातकव्रातकम् ।
सन्धीभूय समूलकाषमखिलं सङ्कृष्य सत्कर्मणां
काण्डं द्राग् अपवर्गमार्गगमने येनार्गलीभूयते ॥ ४॥

नावासं द्युसदां न पन्नगपुरं नान्याश्च भोगस्थलीः
श्लाघेऽहं परमत्र किं तु विपुलाः श्रीभारतीया भुवः ।
स्वेच्छाधावदुदग्रदुष्कलिकरिक्रीडाकृपाणायिता
यास्वेतास्तव वारिणां रविसुते चञ्चन्ति वीचिच्छटाः ॥ ५॥

त्वत्कूले निवसन्वसन्न वृजिनव्यूहोऽभिपुण्वन्मुहुः
पायंपायमपायवारि मधुरं वारि ग्रहेशात्मजे ।
दूरीकृत्य ऋणचयं सफलयन्जन्मात्मनो निर्भरा
नन्दास्वादनतत्परो गमयिता कालं कदायं जनः ॥ ६॥

नो तत्त्वावगमस्पृहा न विपुलायासः सतां सङ्गतौ
नो तत्तन्निगमागमोक्तविविधानुष्ठाननिष्ठापि च ।
येषां तेऽपि जनाः पतङ्गतनये भित्त्वा पितुर्मण्डलं
सोदर्यं च वधीर्य ते सुकृतिनो ब्रह्मात्मतां बिभ्रति ॥ ७॥

वक्तुं ते महिमानमस्मि न विभुर्लोके विकुण्ठोऽप्यलं
कंसारातिकुटुम्बिनि प्रकटयत्प्रीतिं परं कुण्ठिताम् ।
यद्वेदैरपि मृग्यमाणमनिशं तद्ब्रह्म मातर्यत-
स्त्वत्कूलस्थनिकुञ्जमञ्जुवलयक्रोडेषु विक्रीडति ॥ ८॥

इति श्रीयमुनाष्टकं सम्पूर्णम् ।

*Shri Yamunashtakam 9*

pdf was typeset on May 3, 2024

Please send corrections to *sanskrit@cheerful.com*